# Shri Mahalakshmi Stava

# શ્રીમહાલક્ષ્મીસ્તવઃ

## Document Information

Text title : Mahalakshmi Stavah

File name : mahAlakShmistavaH.itx

Category : devii, lakShmI

Location : doc_devii

Author : Anantaram Dikshitar

Transliterated by : Aruna Narayanan

Proofread by : Aruna Narayanan, D.K.M. Kartha

Source : Sri Jayamangala Stotram

Latest update : October 10, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 14, 2023

*sanskritdocuments.org*

# શ્રીમહાલક્ષ્મીસ્તવઃ

મયિ કુરુ મઙ્ગલમમ્બુજવાસિનિ મઙ્ગલદાયિનિ મઞ્જુગતે
    મતિમલહારિણિ મઞ્જુળભાષિણિ મન્મથતાતવિનોદરતે ।
મુનિજનપાલિનિ મૌક્તિકમાલિનિ સદ્ગુણવર્ષિણિ સાધુનુતે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧॥

કલિમલહારિણિ કામિતદાયિનિ કાન્તવિધાયિનિ કાન્તહિતે
    કમલદલોપમ કમ્રપદદ્વય શિઞ્જિતનૂપુર નાદયુતે ।
કમલસુમાલિનિ કાઞ્ચનહારિણિ લોકસુખૈષિણિ કામિનુતે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૨॥

કુવલયમોચકનેત્રકૃપાપરિપાલિત સંશ્રિતભક્તકુલે
    ગુરુવર શઙ્કરસન્નુતિતુષ્ટિસુવૃષ્ટસુહેમમયામલકે ।
રવિકુલવારિધિચન્દ્રસમાદરમન્ત્રગૃહીતસુપાણિતલે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૩॥

કુલલલનાકુલલાળિતલોલવિલોચનપૂર્ણકૃપાકમલે
    ચલદળકાવલિવારિદમધ્યગચન્દ્રસુનિર્મલફાલતલે ।
મણિમયભાસુરકર્ણવિભૂષણકાન્તિપરિષ્કૃતગણ્ડતલે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૪॥

સુરગણદાનવમણ્ડલલોહિતસાગરસમ્ભવદિવ્યતનો
    સકલસુરાસુરદેવમુનીનતિહાય ચ દોષદૃશાહિ રમે ।
ગુણગણવારિધિનાથમહોરસિદત્તસુમાવલિજાતમુદે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૫॥

કનકઘટોપમકુઙ્કુમશોભિત હારસુરઞ્જિત દિવ્યકુચે
    કમલજપૂજિત કુઙ્કુમપઙ્ગિલ કાન્તપદદ્વયતામરસે ।
કરધૃતકઞ્જસુમે કટિવીતદૂકુલમનોહરકાન્તિવૃતે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૬॥

સુરપતિપૂજનદત્તમનોહરચન્દનકુઙ્કુમસંવલિતે
    સુરયુવતીકૃતવાદનનર્તનવીજનવન્દનસમ્મુદિતે ।
નિજરમણારુણપાદસરોરુહમર્દનકલ્પનતોષયુતે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૭॥

દિનમણિસન્નિભદીપસુદીપિત રત્નસમાવૃતદિવ્યગૃહે
    સુતધનધાન્યમુખાભિધલક્ષ્મ્યભિસંવૃતકાન્તગૃહીતકરે ।
નિજવનપૂજન દિવ્યસુમાર્ચન વન્દનકલ્પિતભર્તૃમુદે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૮॥

મમ હૃદિવાસ પરાભવતાપમપાકુરુ દેહિ મુદં હિ રમે
    મયિ કરુણાં કુરુ સાદરવીક્ષણમર્થિજને દિશ ચારુતનો ।
સકૃતભિવીક્ષણજાતમહોદયશક્રમુખાખિલદેવગણે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૯॥

સુતધનમૌક્તિકહૈમનિવેશિતરત્નસુભૂષણ દાનરતે
    રથગજવાજિસમાવૃતમન્દિરરાજ્યસુકલ્પનકલ્પલતે ।
કુસુમસુચન્દનવસ્ત્રમનોહરરૂપકલારતિપોષરતે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧૦॥

ધિમિ ધિમિ ધિન્ધિમિ ધિન્ધિમિ ધિન્ધિમિ દુન્દુભિનાદસુપૂર્ણદિશે
    ઘુમ ઘુમ ઘુઙ્ઘુમ ઘુઙ્ઘુમ ઘુઙ્ઘુમ શઙ્ખનિનાદસુતુષ્ટિવશે ।
નટનકલાપટુદેવનટીકુલચઙ્ક્રમનર્તનદત્તદૃશે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧૧॥

હરિહરપૂજનમદ્ભુતભાષણમષ્ટસુસિદ્ધિમુપાનય મે
    મધુકૃતપાયસમુદ્ગકૃતૌદનભક્ષ્યનિવેદનતુષ્ટમતે ।
સકલસુમાર્પણપૂજનસમ્ભ્રમદેવવધૂકુલસંવલિતે
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧૨॥

અનવધિમઙ્ગલમાર્તિવિનાશનમચ્યુતસેવનમમ્બ રમે
    નિખિલકલામતિમાસ્તિકસઙ્ગમમિન્દ્રિયપાટવમર્પય મે ।
અમિતમહોદયમિષ્ટસમાગમમષ્ટસુસમ્પદમાશુ મમ
    જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧૩॥

કરધૃતશુક્લસુમાવલિનિર્મિતહારગજીવૃતપાર્શ્વતલે

કમલનિવાસિનિ શોકવિનાશિનિ દૈવસુવાસિનિ લક્ષ્મ્યભિદે ।
નિજરમણારુણચન્દનચર્ચિતચમ્પકહારસુચારુગલે
જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧૪॥

અનઘમનન્તપદાન્વિતરામસુદીક્ષિતસત્કૃતપદ્યમિદં
પઠતિ શૃણોતિ ચ ભક્તિયુતો યદિ ભાગ્યસમૃદ્ધિમથો લભતે ।
દ્વિજવરદેશિકસન્નુતિતુષ્ટરમે પરિપાલય લોકમિમં
જય જય હે મધુસૂદનમોહિનિ મોદવિધાયિનિ વેદનુતે ॥ ૧૫॥

ઇતિ શ્રી અનન્તરામદીક્ષિતેન વિરચિતઃ શ્રીમહાલક્ષ્મીસ્તવઃ સમ્પૂર્ણઃ ।

Encoded by Aruna Narayanan

Proofread by Aruna Narayanan, D.K.M. Kartha

*Shri Mahalakshmi Stava*

pdf was typeset on October 14, 2023

Please send corrections to *sanskrit@cheerful.com*